लपूजांकरोतियः तत्समीपेस्थितिंयातिविधिनान्यत्रभावि
ति इदंसत्यमिदंसत्यंसत्यंसत्यंनसंशयः स्वभूमिदिग्जल
गिरिवनसर्वचराःप्रिये सहस्रकोटियोगिन्यस्ताराडाभे
स्त्वात्रापि नियुक्ताह्हिमहादेविजलसंरक्षणायच दिवसेदि
वसेसर्वेपर्वतेजलकानने साधनेनैववीक्षन्तेसर्वपूजा

५४

© Dharmartha Trust J&K. Digitized by eGangotri

दिने क्षया स्व पूजिता स्तनिर्द्वंतिपालयन्तिप्र पूजिताः गु

रु भक्तान्सदाचारान्गुरुधर्मान्सदाशिवान् भक्तिही

नान्दुराचाराज्ञाशायन्तिप्रकाशकान् ऊलार्णवे प्रथ

मोल्लासे श्रीईश्वरउवाच शृणुदेवि प्रवक्ष्यामियन्मांत्वं प

रिपृच्छसि तस्यश्रवणमात्रेणसंसारान्मुच्यतेनरः स्व

स्मिदेवःपरंब्रह्मस्वरूपीनिष्कलःशिवः सर्वज्ञःसर्व

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
५५

कर्त्ता च सर्वेशो निर्मलोव्ययः स्वयंज्योतिरनाद्यन्तो निराकारः
परात्परः निर्गुणः सच्चिदानन्दस्तदंशा जीवसंज्ञिकाः अन्य
नाया समसहिता यथाग्नेर्विस्फुलिङ्गकाः सर्वेप्युपाधिसम्बि
न्नास्ते कर्मभिरनादिभिः सुखदुःखप्रदैः स्वैस्वैः पुण्यपापै
र्नियंत्रिताः उद्भिज्जादिषु हदेहमासृभोग्यमन्वकर्मजं प्र
तिजन्मप्रपद्यंते मानस्यं सूक्ष्मवेत्समः सूक्ष्मं लिंगशरीर

55

© Dharmartha Trust J&K. Digitized by eGangotri

न्तदा मोहादहत्वयंप्रिये स्थावराःक्रमयाश्चान्ताःपश्चावः
पक्षिणोनराः धार्मिकाश्चिदशास्तद्वन्मोक्षणश्चयथा
क्रमं चतुर्विधशरीराणिधृत्वालक्षसहस्रशः सुकृतै
र्मानवोभूत्वाज्ञानीचेन्मोक्षमाप्नुयात् चतुरशीतिलक्षे
षुशरीरेषुशरीरिणां नमानुष्यं विनान्यत्रतत्वज्ञानं
चलभ्यते अत्रजन्मसहस्रेषुसहस्रैरपिपार्वति कदाचि

© Dharmartha Trust J&K. Digitized by eGangotri

श्री·
५८

56

लभ्यते जन्तुर्मानुष्यं पुण्यसञ्चयात् आत्मैव यदि नात्मानम
हितेभ्यो निवेधयेत् कोऽन्यो हितकरस्तस्मादात्मतारक
इष्यते इहैव नरकव्याधेश्चिकित्सां न करोति यः गत्वा नि
रौषधं देशं व्याधिस्थः किं करिष्यति यावत्तिष्ठति देहोऽयं
तावत्तत्त्वं समभ्यसेत् सुदीप्तभवने को वा कूपं खनति ह
मितिः संपदः स्वप्नसंकाशा यौवनं कुसुमोपमं तडिच्च

© Dharmartha Trust J&K. Digitized by eGangotri

पलमायुश्चकस्यस्याज्ञानतोऽप्तिः श्वःकार्यमद्यकर्तव्यंपू
र्वाह्णेचापराह्णिकं नहिप्रतीक्षतेमृत्युःकृतमस्यनवाकृ
तं ब्रह्मविष्णुमहेशादिदेवताभूतराशयः सर्वेनाशंप्र
यास्यन्तितस्मात्श्रेयःसमाचरेत् जीवस्त्यजलोकेवदे
हाद्देहान्तरंविशेत् संप्राप्यचोत्तरंदेहंदेहंत्यजतिपूर्वजं बा
ल्ययौवनवृद्धत्वेयथादेहान्तरादिकं तथादेहान्तरप्राप्ति

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
५७

57

गृहाद्गृहमिवागतः निःसंगएवमोक्षःस्याद्दोषाःसर्वेचसंग
जाः संगात्पतत्यधोज्ञानीकिमुतानात्मवित्प्रिये संगःसर्वात्म
नात्याज्यःसचेत्यक्तुंनशक्यते सद्भिःसहप्रकुर्वीतसतांसंगो
हिभेषजं दुःखमूलंहिसंसारःसयस्यास्तिसदुःखितः तस्य
त्यागःकृतोयेनससुखीनापरःप्रिये आदिमध्यावसानेषुस
र्वंदुःखमिदंयतः तस्मात्संत्यज्यसंसारंतत्वनिष्ठःसुखीभवे

© Dharmartha Trust J&K. Digitized by eGangotri.

न् लोहदारुमयैःपाशैर्दृढंबंधोपिमुच्यते स्त्रीधनादिषुसं
सक्तोमुच्यतेनकदाचन मांसलुब्धोयथामत्स्योलोहशंकुं
नपश्यति सुखलुब्धस्तथादेहीयमबाधांनपश्यति निद्रा
भीमैथुनाहारः सर्वेषांप्राणिनांसमाः ज्ञानवान्मानवः
प्रोक्तोज्ञानहीनः पशुः प्रिये प्रभातेमलमूत्राभ्यांमध्याह्ने
क्षुत्पिपासया रात्रौमदननिद्राभ्यांबाध्यन्तेमानवाः प्रिये

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
५८

स्वदेहधनदारादिनिरताः सर्वमानवाः जायंतेच म्रियन्ते च हा
हन्ताज्ञानमोहिताः स्वस्ववर्णाश्रमाचारनिरताः सर्वमान
वाः नजानंति परंब्रह्मतथाऽनश्यपन्ति पर्वति काममात्रेण
सन्तुष्टाः कर्मकाण्डरतानराः मंत्रोपचारहोमाद्यैर्भ्रामिताः
क्रतुविस्तरैः एकभक्तोपवासाद्यैर्नियमैः कायशोषकैः मू
ढाः परोक्षमिच्छन्ति तवमायाविमोहिताः देहदण्डनमात्रेण

58

© Dharmartha Trust J&K. Digitized by eGangotri

कामुक्तिरविवेकिनां वाल्मीकताडनाद्देविमृता किंन्नु महो
रगाः सांसारिकसुखासक्तं ब्रह्मज्ञोस्मीतिवादनं कर्मब्रह्मो
भयभ्रष्टं जंत्यजेदन्त्यजं यथा गृहारण्यसमालोके गतव्रीडा
दिगंबराः चरन्ति गर्दभाद्यास्तु योगिनस्ते भवन्ति किं तृणप
र्णोदकाहाराः सततं वनवासिनः हरिणादिमृगा देवि यो
गिनस्ते भवंति किं परावताश्शिलाहाराः परमेश्वरि चातकाः

© Dharmartha Trust J&K. Digitized by eGangotri

श्री.
५९

59

नपिबन्तिमहीतोयंयोगिनस्तेभवन्तिकिं शीतवातातपसहा
भक्षाभक्षसमाःप्रिये तिष्ठन्तिशूकराद्याश्चज्ञानिनस्तेभवन्ति
किं आजन्ममरणान्तंहिगङ्गातीरंसमाश्रिताः मण्डूकमत्स्यप्र
मुखायोगिनस्तेभवन्तिकिं तस्माद्दिव्यादिकंकर्मलोकरञ्ज
नकारकं मोक्षस्यकारणंसाक्षात्तत्वज्ञानंकुलेश्वरि षड्द
र्शनमहाकूपेपतिताःपशवःप्रिये परात्मानंनजानन्

© Dharmartha Trust J&K. Digitized by eGangotri

न्तिपशुपाशनियंत्रिताः पठन्तिवेदशास्त्राणिविवदंतिप

रस्परं नजाननिपरंतत्वंदवीपाकरसंयथा प्रज्ञानहीं

नस्यपठनमंधस्यदर्पणंयथा देविप्रज्ञावतःशास्त्रंत

त्वज्ञानस्यकारणं वेदाद्यनेकशास्त्राणिस्वल्पायुर्विघ्न

कोटयः तस्मात्सारंविज्ञानीयात्क्षीरंहंसइवाम्भसि अभ्य

स्यसर्वशास्त्राणितत्वंज्ञात्वातुबुद्धिमान् पलालमिवधा

© Dharmartha Trust J&K. Digitized by eGangotri

न्यार्थीसर्वशास्त्राणिसंत्यजेत् यथामृतेनतृप्तस्यनाहारे
णप्रयोजनं तत्वज्ञस्यतथादेविनशास्त्रेणप्रयोजनं नवे
दाध्ययनान्मुक्तिनशास्त्रपठनादपि ज्ञानादेवहिमुक्तिः
स्यानान्यस्माद्वीरवन्दिते नाश्रमाःकारणंमुक्तेर्दर्शनानि
नकारणं तथैवसर्वशास्त्राणिज्ञानमेवहिकारणं अद्वै
तंहिशिवंप्रोक्तंक्रियायासविवर्जितं गुरुवक्त्रेणलभ्यं

60

© Dharmartha Trust J&K. Digitized by eGangotri

तन्नश्यत्यागमकोटिभिः अद्वैतं केचिदिच्छंति द्वैतमिच्छंति
चापरे मम तत्त्वं न जानंति द्वैताद्वैतविवर्जिताः द्वे पदे
बन्धमोक्षाय ममेति निर्ममेति च ममेति बध्यते जन्तु
र्निर्ममेति विमुच्यते यावत्कर्मादि दीप्येत तावत्संसारवा
सना यावदिंद्रियचापल्यं तावत्तत्त्वकथा कुतः यावद्दे
हाभिमानश्च ममता यावदेव हि यावन्न गुरुकारुण्यं

© Dharmartha Trust J&K. Digitized by eGangotri

श्री·
८१

तावन्नत्वकथाऽजनः यावत्प्रयत्नवेष्टोस्ति यावत्संकल्पक
ल्पनं यावन्नमनसस्थैर्यंतावन्नत्वकथाऽजनः तावन्न
पोव्रतेतीर्थजपहोमार्चनादिकं वेदशास्त्रागमकथा
यावन्नत्वंनविंदति तस्मात्सर्वप्रयत्नेनसर्वावस्थासुस
र्वदा भत्वनिष्ठोभवेद्देवियदेछेत्सिद्धिमात्मनः धर्मज्ञान
स्त्रष्ठ्यस्यस्वर्गलोकफलस्यच तापत्रयार्निसंतमछाया

6'

© Dharmartha Trust J&K. Digitized by eGangotri

मोक्षनरोःश्रयेत् इतिश्रीकुलार्णवेमहारहस्येसर्वागमोत्त
मेसपादलक्षग्रन्थेपञ्चमखण्डेऊर्ध्वाम्नायतन्त्रेजीवस्थि
तिकथनंनामप्रथमोल्लासिकेचित् श्लोकः ॐनमःपरदेव
तायै तत्वानन्दतरंगिण्यां मेदिनींघासंपूर्णांब्राह्मणेवे
दपारगे दत्वायत्फलमाप्नोति तत्फलंकौलिकार्चने अ
श्वमेधसहस्राणिवाजपेयशतानिच इष्ट्वायत्फलमा

© Dharmartha Trust J&K. Digitized by eGangotri

श्री·
८२

6२

मोतितत्फलंकौलिकार्चनात् मेरुतुल्यसुवर्णंचब्राह्मणेवे
दपारगे दत्वायत्फलमाप्नोतितत्फलंकौलिकार्चनात् वा
पीकूपतडागानिकृत्वायत्फलमाप्नुयात् तत्फलाल्लक्षगुणि
तंकौलिकानांप्रपूजनं कौलिकंपूजयेद्यस्तुकुलशास्त्र
परायणः सयातिनरकेघोरेसत्यमेवनसंशयः ज्येष्ठा
त्ककमतोदद्याद्वीरपात्रेकुलेश्वरः शुद्ध्यादिरहितंपा

© Dharmartha Trust J&K. Digitized by eGangotri

त्रेनार्पयेत्तु कदाचन एकेन पाणिना वापि कदाचिन्नार्पयेद्बुधः अभिविज्ञाय वीराय कुलमन्त्रपराय च ततः सामयिकः पात्रं पाणिभ्यामाहरेदथ नमस्कृत्य यथान्यायमन्यथा नरकं व्रजेत् आधारोपरि संस्थाप्य नतो मन्त्रैः प्रकल्पयेत् तस्योपरि जपेन्मन्त्रमष्टधा साधकोत्तमः आनन्दभैरवं देवं श्रीगुरुं परमेश्वरीं विधिवत्तर्पणं कु

© Dharmartha Trust J&K. Digitized by eGangotri

श्री-
८३

त्वातत्वशुद्धिं समाचरेत् विधिवद्वन्दयेत्पात्रं प्राणमेत्भक्ति
तोमिथः दत्तेशुद्ध्यादिकंनीत्वासव्येनपात्रमाहरेत् गृह्णा
मीतिस्वयंप्रोच्यततोनुज्ञांलमेद्गुयः गुरुभ्यःसाधकेभ्यो
वाज्ञप्तस्वेतिसमाहितः द्रव्यंवाणगुणान्वितोलकमिति

63

ध्वाकरांभोरुहेध्यायन् श्रीगुरुपादुकांमितमहापमे
सथामंडले पश्चात्कन्दनिवासिनींभगवतींचैतन्यरू

© Dharmartha Trust J&K. Digitized by eGangotri

णो परं संतर्प्यामृतधारया सहस्रकृतिनोदीप्यंति लोकत्रये
शाह्वे नैव पिबेन्मुरामृतरसं नैकेन हस्तेन वा विंडं नैव नि
यानयेत्त्रितिनलोपञ्ज्यो न पात्रं स्पृशेत् साधारं न हि वाल
येन्न हि नथास्थानां नरे स्थापयेन्मुद्रामीन पलादिवर्जि
नमहो नैवं कुलीनो हरेत् न स्थूलं न हि सूक्ष्ममेव चषकं
भग्नं न वा संकरं नैवं तीर्थसपूरितं न च सयागं येन हीनं

त्रिभागं पूरयेत्पात्रं न
निपात्रं डपूरयेत् ——

© Dharmartha Trust J&K. Digitized by eGangotri

श्री
८५

64

विना नैवं पूर्तिरस्मान्विनं किमथवा मन्त्रैर्विहीनं न हि स्वी
कुर्यात्कुलनायिको यदि भवेद्धर्मी यमोद्वोर नः निजशक्तिं
वीरशक्तिं कुलदीक्षारतां च वा पाययित्वापि वेद्द्रव्यमिति
शास्त्रस्य निर्णयः एकासने चक्रमध्ये निविष्टा येन राधमाः
भुञ्जाना एकपात्रे वा ने पनञ्जि सदारुणे एकेन चषकेना
पिये पिवंति परास्थने नेयांति नरके घोरे मोहादज्ञान

© Dharmartha Trust J&K. Digitized by eGangotri

नोपिवा नैवस्पृशेत्कुलद्रव्यमुच्छिष्टान्विनपाणिना प्रद्या
त्पाणीवाथेत्कुलद्रव्याणिदापयेत् निजपात्रास्थतं
वीरोभैरवायापिनार्पयेत् अर्पणेसिद्धिहानिःस्यात्क्रुद्धा
भवन्तियोगिनी गुरुशक्तिसुतानाञ्चगुरुजेष्ठकनिष्ठयोः
उच्छिष्टंभक्षयेत्स्त्रीणांनाभ्योनोच्छिष्टमर्पयेत् सुविचार्य
पिवेन्मद्यंशाक्तउच्छिष्टंपरामस्थतं वीरोच्छिष्टंचर्वणञ्चचर्व

© Dharmartha Trust J&K. Digitized by eGangotri

श्री·
९५

येत्कुलनायकः कनिष्ठेभ्यः स्वशिष्येभ्यो दद्याद्बुद्धिष्टमेवहि
दद्यात्स्नेहेनयोन्येभ्यः सभवेदापदांपदं डौद्देसीत्यंपरीहासं
प्रलापंबहुभाषणं भयंक्रोधंवितण्डांश्चचक्रमध्येविव
र्जयेत् श्रीचक्रमध्येयद्दृत्तंशुभंवायदिवाशुभं प्रभातेत
न्नवक्तव्यमित्याज्ञाशंभुनाकृता त्यजेन्निष्ठीवनंचक्रेतथा
धोवायुनिर्गमं अन्योन्यंचधर्षकंमैत्रीनाउयेत्क्वदाचन प्रा

65

© Dharmartha Trust J&K. Digitized by eGangotri

न्या विनातु यस्यानं यस्यानं मन्तुनाविना यस्यानं न तर्पनै ही
नं तस्यानं निष्फलं भवेत् विनाश्रुद्धात्विते स्त्रीर्ये नर्पयेत्र
कदाचन तर्पणं निष्फलं विद्यात् क्रुद्धा भवंति चण्डिका ब्र
ह्मज्ञानी कुलाचारे सुरां पीत्वा स्खलन्मुहुः भूमौ निपतति
तस्यां गे मिलन्ति यदि देवाः यावत्कालं देण्ड संख्या ब्रह्मलो
के महीयते पीत्वा पीत्वा पुनः पीत्वा पुनः पतति भूतले उ

© Dharmartha Trust J&K. Digitized by eGangotri

श्री·
९९

66

स्यायचपुनः पीत्वापुनर्जन्मनविद्यते पीत्वालिङ्गकुलाचारे
प्रमत्तोयोवनोन्नतो कोटिजन्मार्जितंपापंतत्क्षणादेवनाशये
त् पीत्वापीत्वाजपित्वाचमुक्तः कोटिकुलैःसह ब्रह्मलोके
वसेन्नित्यंसत्यंसत्यंहिनिश्चितं नदेवलयमाप्नोतिनपुनः
प्रपन्नेदिह अथमातृकाभेदतन्त्रे श्रीदेव्युवाच मद्यदानेम
हापुण्यंसर्वतन्त्रेषुकृतंमया जातिभेदेनकथितमिदानींतु

© Dharmartha Trust J&K. Digitized by eGangotri

स्वकाशाय शंकर उवाच सर्वयज्ञाधिपो विघ्नः संज्ञायो नास्ति
पार्वति सौत्रामण्यां महायज्ञे चत्वारो ब्राह्मणादयः ब्रा
ह्मणस्य महामोहं मयदानं प्रियम्वदे ब्राह्मणः परमेशा
नि यदि पानादिकं चरेत् तत्क्षणे शिवरूपो सौ सत्यं सत्यं
हि शैलजे तोयेनोयं यथा लीनं तेजस्तेजसि वा यथा
घटे भग्ने यथाकाशं वायो वायुर्यथा प्रिये तथैवमद्यपा

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
८७

नेनब्राह्मणोब्रह्मणिप्रिये लीयतेनात्रसन्देहः परमात्मनि
शैलजे मद्यपानंविनादेविनज्ञानंतुनलभ्यते अतएवहि
विप्रोहिमद्यपानंसदाचरेत् वेदमाताजपेनैवब्राह्मणोन
हिशैलजे ब्रह्मज्ञानेयदादेविनदाब्राह्मणउच्यते देवानांमा
स्तंब्रह्मतदिदंलौकिकीसुरा सुरत्वंभोगमात्रेणसुराते
नप्रकीर्त्तिता मंत्रत्रयंसदापाठ्यंब्रह्मशापादिमोचनं

६७

© Dharmartha Trust J&K. Digitized by eGangotri

प्रकृ्वीतद्विजेनैवतदाब्रह्ममयीसुरा हविरारोपमात्रे

णवक्रिदीप्तोयथाभवेत् पापमोचनमात्रेणसुरामुक्ति

प्रदायिनी अतएवहिदेवेशिब्राह्मणःपानमाचरेत् स

ब्राह्मणःसवेदज्ञःसोग्निहोत्रीसदीक्षितः बहुकिंकथ्यते

देविसएवत्रिगुणात्मकः श्रीचंडिकोवाच कारणेनमहा

मोहंतनिर्मील्यनशिवास्यच श्रुतंवेदपुराणेषुतनववक्त्रे

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
८८

सुरेश्वर अग्राह्यंतव निर्माल्यमग्राह्यं कारणं विभो स्पष्टावा
क्यं महादेव कथं वदसि योगभृत् श्रीशंकर उवाच शृणु
देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि तत्तत्सर्वं प्रवक्ष्यामि
सावधानावधारय चतुरशीतिलक्षेषु सहस्रेषु तथैव
हि भ्रमन्नेकतने जीवस्ततो मोक्षस्य भाजनं एतन्मध्ये महा
स्नानं यदि स्यात्ही रवद्दिने तदा मोक्षमवाप्नोति भ्रमणंकस्य

68

© Dharmartha Trust J&K. Digitized by eGangotri

वाभवेत् श्रुतएवमहादेविशुभभावंमयाकृतं यस्यजन्मन

म्र्वर्त्त्वसकण्ठंमोक्षभाजनं यस्यपापाधिकंदेविसकण्ठंस्व

र्गभाजनं श्रुतएवमहेशानिशुभभावंमयाकृतं निर्माल्ये

नभवेत्स्वर्गोनिर्वाणंस्तरयाभवेत् पापयुक्तोपिचाण्डा

लोनिर्माल्यंगल्लनेयदि तदामोक्षोभवेत्सत्यंशिवरूपोन

चान्यथा महापातकयुक्तेनकारणंयदिपीयते ज्ञाना

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
८५

न्मुक्तिं लभेत्सत्यं जातिभेदादिकं नहि सर्वजातिषु निर्वाणं ज्ञा
नेन परमेश्वरि अन एव महेशानि ग्रमभावं मया कृतं गम
भावार्थं यद्धाक्यं परीक्षासार्थमेव च तत्तदर्थेन तद्धाक्यं न
मिथ्या परमेश्वरि निर्वाणविषये देवि मद्यं परमकारणं
मद्यपानं विना देवि महामोक्षो न लभ्यते चंडिकोवाच
गंगायां ज्ञानतो मोक्षं तत्रैव म्रियते यदि गंगायाश्चापि

6१

© Dharmartha Trust J&K. Digitized by eGangotri

केनाथकारणंपरडुर्लभं शंकरउवाच सर्वब्रह्ममयी दे
वी सुरादेवीनचान्यथा तस्याश्च षोडशांशै कायागंगा
सुरसजिता निर्वाणतंत्रे श्रीशंकरउवाच शृणुदेवि
प्रवक्ष्यामितत्वंपरमदुर्लभं कृत्वागोपययत्नेनस्व
योनिरिवसुन्दरि मद्यंमांसंतथामत्स्यंमुद्रामैथुनमे
वच पञ्चतत्वमिदंदेविनिर्वाणमुक्तिहेतवे सर्वैश्वर्यं

© Dharmartha Trust J&K. Digitized by eGangotri

श्री·
८·

परंमोहंमद्यपानेनमैथुनजं मांसभक्षणमात्रेणसाक्षान्ना
रायणोभवेत् मत्स्यभक्षणमात्रेणकालीप्रत्यक्षताभवेत्
मुद्रासेवनमात्रेणपूज्योमेविश्वरूपधृक् मैथुनेनमहा
योगीममतुल्योनसंशयः जन्मांतरेषुदेवेशिमयैवकथि
तंपुरा माहात्म्यंचास्यदेवेशिपुरैवकथितंमया तत्वज्ञा
नमिदंकांतेनिर्वाणमुक्तिकारणं पकवपंचतत्वानि

70

© Dharmartha Trust J&K. Digitized by eGangotri

यत्रैवमेलनं भवेत् नत्रैवाहं प्रगच्छामि नेनरामन्त्र माः
सदा सा नारी कालिका रूपा स्तेन सांप्रलीयन्ते येनराः
सा पुरूपास्तत्त्वज्ञानापरायणाः जीवन्मुक्तास्तेप्रोक्ता
ब्रह्मरूपास्तनान्यथा सायुज्यादि महामोक्षं नियुक्तादन
त्रियादिषु ब्राह्मणाः परमेष्ठानियदितत्त्वपरायणाः
सत्यं सत्यं पुनः सत्यं परतत्त्वे प्रलीयन्ते यथा तोयं तोय

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
७१

71

मध्येलीयते परमेश्वरि तथैवजलवत्सैवायां लीयते परमात्म
नि इतितेकथितं कांतेतत्वज्ञानं विमोक्षदं येनज्ञानप्र
सादेन मोक्षसिद्धिर्नसंशयः दिनिं विना यथा नास्ति
संस्थितेः कारणं सदा तोयं विना यथा नास्ति पिपासाना
शकारणं तमोहन्ता यथा नास्ति भास्करेण विना प्रिये वि
नावह्नि प्रयोगेन यथा किंचिन्न पच्यते विना चंद्रेण

© Dharmartha Trust J&K. Digitized by eGangotri

देवेशि सुयाहृष्टिर्नजायते मातृगर्भंविनाकांते उत्पत्ति

र्नैवजायते अतएवमहेशानिगोपनेऊहयन्नतः दि

व्यभावयुतोदेविनत्वज्ञानेसमाचरेत् वीरभावयुता

नांचनन्त्वंसेव्यंसदानघे नपशोरालयेकुर्यान्नपशोर्ज्ञा

नगोचरे नपशोसन्निःधानेचनपशोर्दृष्टिगोचरे अ

न्यथापतितकीटस्पर्शनेनहिकारयेत् नैवैवकाम

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
७२

नासिद्धिर्यत्रचक्रंप्रपूजयेत् श्रीचक्रपूजांयःकुर्यात्सरवंशो
द्भवव्ययः अश्वमेधसहस्राणिवाजपेयशतानिच इष्ट्वाय
त्फलमाप्नोतितत्फलंकौलिकार्चनात् वापीकूपतडागानि
दत्वायत्फलमाप्नुयात् तत्फलंकोटिगुणितंयदिचक्रंप्रपू
जयेत् तद्दत्तंमेरुतुल्यंस्याद्धिंडसिंडसमोपमः पुष्पंच
मेरुसदृशंयदिचक्रंप्रपूजयेत् तन्मध्येवर्तितेदेविय

© Dharmartha Trust J&K. Digitized by eGangotri

दिव्याधियुतोनरः शिवबुद्ध्याप्रपूज्योहिभ्रान्तिनत्रविव

र्जयेत् सूर्यस्यप्रतिबिम्बंयत्तोयेचपरिदृश्यति गंगा

तोयेयथासूर्योहीनतोयेतथापुनः सूर्यस्यहूयणेना

स्तिसूर्येकःपरितिष्ठति तथैवपरमेशानिसाधकेना

स्तिहूयणं मंत्राराधनमात्रेणतदात्मानन्मयोभवेत्

अतएवमहेशानिहूयणंनास्तिरेतसि रेतःपवित्र

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
७३

परमं शाक्के मोक्षस्य कारणं एवंविद्रूपायां नारी सवज्ञा
ऊह्नैयदि धनपुत्रैर्वर्जितस्सचंडालो न चान्यथा
इति ते कथितं कांते तत्वज्ञानं विमोक्षदं येषां देहेम
हेशानि तत्वज्ञानं विमोक्षदं येषां देहे महेशानि त
त्वज्ञानं मयोदितं ते पुनर्जननीगर्भे न विशंति कदा
चन जीवन्मुक्तास्तु ते प्रोक्ताः शिवरूपास्तु ते नराः पुर

73

© Dharmartha Trust J&K. Digitized by eGangotri

स्वरणरसोल्लासे चंद्रसूर्यग्रहे देविनराणिगणयेत्कदि
न् ब्राह्मणःक्षत्रियोवैश्यस्तथाशूद्रश्चपार्वति नराशि
गणयेद्वेगणयेपवनःसदा सूर्यग्रहणकालाद्धि
नान्यकालःप्रशस्यते सकालःपरमेशानिपरंब्रह्म
समूर्निमान् ग्रहणेचंद्रसूर्यस्यनन्नपेयदिपामरः
सर्वपुण्यंपरित्यज्यविष्टायांजायतेक्रमिः ज्ञानतो

© Dharmartha Trust J&K. Digitized by eGangotri

श्री
७५

त्रेपंचमपटले मायापिमुक्तिमार्गस्यविज्ञेयापरिपन्थि
नी मातृष्टाचजगद्धात्रीमुक्तिदात्रीहिजेश्वर निराकारा
तुसाशक्तिर्ब्रह्मरूपासनातनी निराधाराह्येककलास्व
रूपंचैवविनिःसृता समयाचारतंत्रे गुरुंशिवंतथादेवी
नित्यंचैकेनभावयेत् केवलंशिवरूपोहंत्रितिज्ञाने
समाचरेत् जीवःशिवःशिवोजीवःसजीवःकेवलः

74

© Dharmartha Trust J&K. Digitized by eGangotri

शिवंः पाशावद्धःसदाजीवःपाशमुक्तःसदाशिवः सदा
शिवमयोभूत्वा पंचमुद्रादिकंचरेत् सर्वंब्रह्ममयंप
श्यन्दोषैर्नैवविलिप्यते मोहाद्वाकामतोवापियःकश्चि
दिहवर्तते सोऽधमःसाधकानांचनारकीभवतिध्रुवं
इहलोकेनिंदितस्यात्परत्रनरकंव्रजेत् श्राद्धेशुक्लवि
भागेनद्विधाचारंशृणुष्वप्रिये श्राद्धाचारस्तुविज्ञेयोमका

© Dharmartha Trust J&K. Digitized by eGangotri

श्री·
७५

75

रैपञ्चभिर्युतः मकारपञ्चरहितःशुद्धाचारःप्रकीर्त्तितः
कलौविशेषतोदेविश्चार्द्धीचरःप्रकीर्त्तितः षडाम्नायेषु
देवेशिनानातन्त्रेषुदेवताः विद्यामंत्रविभागेनदेवता
श्चार्द्धिताःकलौ अथविजयाध्यानं सिद्धासांशिवगेहिनी
करतलसन्याशाङ्कशांभैरवीभक्ताभीष्टफलप्रदांच
सुभगांसंसारबंधछिदां पीयूषाम्बुधिमध्यनोद्भव

© Dharmartha Trust J&K. Digitized by eGangotri

रसांसम्विह्विलासांपरांवीरारायनपाङ्कांह्रविजयांव
न्देजगन्मोहिनींनिरञ्जरतंत्रेगुप्तवेश्यपामहावेश्यपाकुलवे
श्यपामहोदयाजवेश्यपादेववेश्यपाव्रलवेश्यपाचसन्मथाकु
लजागुप्तवेश्यपासानिर्लज्जामदनातुराप्रच्छभर्त्तीश्रिता
लोकेगुप्तवेश्यपाप्रकीर्त्तिताकुलजाकुलवेश्यपाचमहा
वेश्यपाप्रकीर्त्तितामहावेश्यपाकुलेश्यानिस्वेच्छयाव

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
७८

76

दिगम्बरी कुलवेषधा कुलीनाचवीरपत्नीकुलेश्वरि म
होदयासमीख्यानाखेड्याचिपरीनगा राजवदाहरेयस्मा
द्राजवेषधा प्रकीर्त्तिता शिवंसंयोज्यचक्रेचजपपूजापरा
यणा देववेषधा समाख्याताविष्णुलोकेषुपूजिता शिवं
संयोज्यचक्रेचजप्याचचानन्तरेत् भगलिंगकथाला
पाद्वेबयेच्चपुनःपुनः एवंविधाकुलीनाचेद्ब्रह्मवेषधा

© Dharmartha Trust J&K. Digitized by eGangotri

प्रकीर्त्तिता दिव्यशाक्तेवरशाक्तेष्वेताःसंज्ञाःप्रकीर्त्तिताः
चन्द्रवर्णोद्भवानांचसंज्ञैताःपरिकीर्त्तिताः वेश्यावद्रम
तेयस्मात्तस्माद्वेश्याप्रकीर्त्तिता वर्णसंकतोजाताःसर्वा
वेश्याप्रकीर्त्तिताः जलमार्गगतायाचसावेश्यामोक्ष
दायिनी चुंबनालिंगनंचैवरतिविग्रहदर्शनं श्रामन्त्रणं
विमर्ष्यंचभगलिंगस्यकीर्त्तनं वेश्यानांचजपोगेदेशं

© Dharmartha Trust J&K. Digitized by eGangotri

श्री
७७

77

कौरेणप्रोदिते जपांगेनविनावेध्यानकुर्याद्विरसंगमे
जपांगेप्रसहेकुर्यात्स्वशिवैःसहमोदिनी निशायांप्रजपे
मंत्रेस्वयन्त्रेशिवयोगतः वधूनांजपमात्रेणपुरश्चरणमु
च्यते विपरीताजपेमंत्रेसाकालीनात्रसंशयः योषितांमं
त्रसिद्धिःस्याद्विपरीतरतौप्रिये विपरीतरतौजप्यासर्वस
म्पत्तिमालभेत् विपरीतरतौजप्यानिर्वाणपदवींव्रजे

© Dharmartha Trust J&K. Digitized by eGangotri

न विपरीतरतौजम्माकालीवह्निहरेर्भुवि विपरीतरता
कालीविपरीताविनारिणी विपरीताचयावेश्यासा
कालीनात्रसंशयः योविह्नियानसिद्ध्यंनिविपरीतर
तिंविना विपरीतरतावेश्यात्रिषुलोकेषुपूजिता गा
ढमालिंगनंदत्वाचुम्बयित्वापुनःपुनः कटाक्षैदर्शि
येद्यंत्रंदक्षिणाकौलिकीरिता एवंवियाप्ररश्वयी

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
७८

वेश्यायामस्त्रकुलेश्वरि एवं विधाभवेद्वेश्यानवेश्याकुल
टाप्रिये कुलटासंगमाद्देवि रौरवंनरकंव्रजेत् वीर
शक्तिर्भवेद्वेश्यासाशाक्तास्वस्वपाथने पुरश्चर्यीकृता
वेश्यायोजपेत्कुलसाधने शिवलिंगगतासाक्षीशिव
लिंगगतासती शिवलिंगगतावेश्यासाक्षीसापरि
कीर्त्तिता योनिश्चजनिकामातालिंगश्चजनकःपिता

78

© Dharmartha Trust J&K. Digitized by eGangotri

स्तभावंपित्रभावमुभयोःपरिचिंतनं लिंगरूपोमहा
कालोयोनिरूपाचकालिका तयोर्योगपरायन्यातयोर्यो
गपरोमहान् तयोर्योगःपरोधर्मःतयोर्योनःपरःसुखः
स्वभैरवंविनावेष्पाशिवपूजाकरोतिया रौरवेनरके
चोरेवमेदाहूतमेशवं स्वभैरवंविनावीरंमनसानैव
संस्मरेत् संस्मृतेनरकंयातिमहाव्याधिपराभवेत् ना

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
७९

नावीराश्रितावेश्यापश्चवेश्याकुलेश्वरि सावेश्यानर
कंयातिसत्यंसत्यंनसंशयः कामाद्वालोभतोवापिधनाद्वा
वरवर्णिनि पशुसंगगतावेश्यारौरवंनरकंव्रजेत् नाना
वीराश्रितावेश्यापशुसंगरतायंचया वर्जनीयाप्रयत्ने
नकुलसाधनकर्मणि योज्याचेत्सिद्धिहानिःस्याद्दुष्टवे
श्याकुलार्चने रोगःशोकोभवेत्तस्यायनहानिःक्षणोक्ष

७९

© Dharmartha Trust J&K. Digitized by eGangotri

एतस्मात्सर्वप्रयत्नेनस्वशिवंचसमाश्रयेत् जपपूजा
दिकंवेष्यास्वशिवेपरिकल्पयेत् प्रत्यिनाकामसम्प
न्नासदारमणामुत्सुका सर्वसिद्धिप्रदावेष्याकालिका
रूपधारिणी पितृभूमिःसमाख्यातासदाशिवनिवा
सिनी शिवपवाशिवाज्ञेयोलिंगहूपधरोयतः शि
वस्थानेश्मशानस्थानेस्याचश्मशानेऊलजागरहं

© Dharmartha Trust J&K. Digitized by eGangotri

श्री· प·

80

अष्टम्यां च चतुर्दश्यां पापघ्न्योरुभयोरपि श्मशाने नागतो

नार्चेद्धीरस्तु पशुवद्भवेत् तद्यंत्रं पूजितं येन सर्वं यंत्रं प्र

पूजितं तत्र संपूज्य संजप्य निर्वाणपदवीं व्रजेत् मातृमु

खे पितृमुखे दत्वा कालीसनातनी सर्वपापविनिर्मुक्तो

निर्वाणपदवीं व्रजेत् वेदेभ्यो जायते कर्मकर्मणा

बंधनं भवेत् वैदिकं कर्म संत्यज्य स्वरं तेषु सदाज

© Dharmartha Trust J&K. Digitized by eGangotri

पेत् आगमोक्तपतिः शंभुरागमोक्तपतिर्गुरुः सप
तिः कुलजायास्तु नपतिस्त्वविवाहितः विवाहित
पतित्यागी हृष्ठणं न कुलार्चने विवाहितपतिं नै
वत्यजेद्वेदोक्तकर्मणि आगमोक्तपतिस्त्वातास्त्वाग
मोक्तपतिः शिवः सिद्धविद्यानसिद्धंतिस्त्वागमोक्तप
तिंविना॥ आगमोक्तपतिर्देवि योषितां मोक्षदायकः

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
८८

कालीनैवयजेद्योविद्वानमोक्षपतिंविना कुलज्ञागुरु
वेदेविपतिंनैवरणंचरेत् नदासागमवेश्यापास्यात्कु
लज्जाचपतिंविना गमवेश्याभवेत्सैवकुलमार्गप्रव
र्तिना कुलमार्गप्रहन्नायासासुक्तानात्रसंशयः कुल
जागुरुवेदेवियदिपत्यन्तकामभवेत् परजवेनिश्च
नेश्यापाप्यथवाकुलीनामभवेत् सुकोत्मारणकालं

8'

© Dharmartha Trust J&K. Digitized by eGangotri

त्तनिर्वाणंविद्धिपार्वति नकालस्तुमहाकालःकुलमा
र्गप्रवेशिनां श्रृक्रोत्सारणकालेत्तुविज्ञापयन्तिसाध
कं कुलीनाप्रजपेन्मंत्रंजपांगेननिराकुलं श्रृक्रोत्सा
रणकालेत्तुकायेनमनसापिवा श्रृंगभंगक्रमेणेव
कुलीनायप्रकाशयेत् श्रृक्रोत्सारणकालस्यज्ञाप
नात्कालिकास्वयं जपांगेःकालिकादेवीमहाकालं

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
८२

विमोहयेत्‌ कलौ तावद्ब्रह्मवेश्या चेनाल्पस्य तपसः फलं
बहूनां जन्मनामंते ब्रह्मवेश्या प्रजीयत्‌ त्वत्समा
प्रकृतिः काचिदप्यस्ति भूमिमंडले नतथानन्तमाश
क्तिस्त्रिषु लोकेषु विद्यते सा चैव दक्षिणाकालीमद
नातुरविह्वला तस्या शिवो महाकालः सत्यं सत्यंन
संशयः षोडशाब्दा यदासास्या काली विक्रमतत्प

© Dharmartha Trust J&K. Digitized by eGangotri

ग तारापञ्चदशाह्वाचैनचतुर्दशाह्वाचसुंदरी त्रयो
दशाह्वाचोन्मुखीस्याद्द्वादशाह्वाचभैरवी एताद्दशपञ्च
णोपीत्वाब्रह्मवेषपाकुलेश्वरि महामाधीसमाख्या
ताविष्णुलोकेषुदुर्लभा स्वर्गेमर्त्येचपातालेयायानि
ह्यतिचांगना सर्वासामपिभर्ताचदिव्योवीरश्चसाधकः
योगीदिव्योयदावीरःसर्वनारीपतिर्भवेत् दिव्योपि

© Dharmartha Trust J&K. Digitized by eGangotri

श्री·
८३

वीरभावेनसर्वंजानुजन्मवांयजेत् ॥ श्रमदेवप्यामह्यादेवप्या
ग्रयोध्यामपुराप्रिये मायाचक्रलदेवप्यास्यान्महीदया
चकाशिका कांचीवराज्ञदेवप्यास्याहेवदेवप्याश्रवं
तिका द्वारावतीव्रह्मदेवप्यासमेतामोक्षदायिकाः कु
लीनाभवतीसाक्षात्कालीनारासरस्वती कुलीनाभै
रवीराधाकुलीनाछिन्नमस्तका कुलीनासुंदरीदेवी

८३

© Dharmartha Trust J&K. Digitized by eGangotri

ऊलीनामहिषमर्दिनी ऊलीनाभुवनाबालाऊलीना
बगलामुखी ध्मावनीऊलीनाचमातंगीऊलीनाक्षि
ये ऊलीनाचान्नपूर्णास्यात्रिपुरान्वरिनातथा पतिव्र
ताऊलीनाचसतीसाधीमहोदया ऊलीनामंत्रयंत्रा
णांसिद्धिदानात्रसंशयः ऊलीनादेवकन्याचऊलीना
योगिनीगणाः रंभोर्वशीरतीरामानिर्लीनमाऊलसं

© Dharmartha Trust J&K. Digitized by eGangotri

श्री·
८४

सुंदरी प्रतास्सर्वाः पृथिव्यांच विहरंतिकुलात्मजाः कुल
जाकुलवेश्यायाकुलधर्मपरायणा पशुभर्त्रीस्त्रिताले
लाकामकौतकलालसा कुलवर्त्मक्रमेणैव साचस्या
द्रमणोन्हकाविदग्धावीरभावेनवीरारायननत्परा
कुलजाकुलवेश्याचेद्दीरमेकं समाश्रयेत् संत्यज्यप
शुभर्तारं कुलमार्गे प्रवेशयेत् कुलमार्गसमाश्रित्य

४५

© Dharmartha Trust J&K. Digitized by eGangotri

वीरमेकंसमाश्रयेत् कुलमार्गेप्रवृत्ताचेत्पतिहीना भवेद्यदि कुलजावाकुलीनावापरजन्मनिजायते कुलधर्मरतापाप्ताकुलधर्मेप्रकाश्यवा पूजार्हा सामहेशानिपतिहीनांनपूजयेत् लोकाचारक्र मेणैवपूजार्हालजितायदि तांविहायमहेशानिकु लजान्वप्रपूजयेत् कुलीनादर्शनेनैवसर्वपाप

© Dharmartha Trust J&K. Digitized by eGangotri

नयोभवेत् गंगास्नानसहस्रमात्रेणयथापापक्षयोभवेत् कु
लजाचकुलीनावन्मत्रतन्त्रफलप्रदा महावेश्या
भवेत्सैवसर्ववेश्याफलप्रदा यासांचसिद्धिविद्यानां
प्रशस्तायाकुलार्चने सैवशक्तिर्विशेषेणसर्ववेश्या
प्रकीर्त्तिता कुलजानांप्रशस्तायाकुलीनावत्कुलेश्वरि
सर्ववेश्याहीनजातौसर्वसिद्धिप्रदायिनी विहि

श्री॰
८५

८५

॥

© Dharmartha Trust J&K. Digitized by eGangotri

तान्योहीनजातांपूजयेद्भवनीयतिः ब्रह्मचारीगृही
वापिविहितान्यानचार्चयेत् अर्चयेत्सिद्धिहानिः
स्यादुःखंतस्यपदेपदे हीनजांविहितांरम्यांमनसा
चप्रपूजयेत् नद्योगंवर्तिनयेद्धीमान्छनमष्टोत्तरं
जपेत् जन्माप्रणम्यदेवेशिभक्तद्रव्यंनिवेदयेत् कामा
द्वालोभतोवापिहीनजांयदिगच्छति । रौरवेनर

श्री॰
५८

४६

केयाग्निहीनजासंगमेनच हीनजासंगमेदेविमन
सानसमरेत्कलौ कुलधर्मप्रवृत्तोयःसमुक्तोनात्रसं
शयः कुलधर्मप्रवृत्तायासासुक्तानात्रसंशयः अने
कजन्मनानेनेकुलधर्मेप्रवर्तने कुलधर्मेविनादेवि
नचमोक्षंप्रजायते कुलपूजांविनादेविकालीनाग
नसिद्धति कुलपूजांविनादेविसुन्दरीनैवासिद्ध्य

© Dharmartha Trust J&K. Digitized by eGangotri

त्ति कुलपूजां विना देवि पंचमी नैव सिध्यति कुलपू
जां विना देवि भैरवी न व सिध्यति कुलपूजां विना
देवि छिन्नमस्ता न सिध्यति कुलपूजां विना देवि
तत्वज्ञानं न जायते तत्वज्ञानं विना देवि निर्वा
णं नैव जायते निर्वाणं श्रेय संप्राप्य न स योगे प्र
वर्तते निर्वाणं श्रेय संप्राप्य मूलं च कुलमंदिरे

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰ ९० 87

पंचमैपूजयेत्कालींकुलीनाकुलमंदिरे ब्रह्माविष्णु
श्चरुद्रश्चईश्वरश्चसदाशिवः इंद्रादिदशादिक्पाला
श्चादित्यादिनवग्रहाः असितांगाद्योयेयेभैरवाश्च
स्कंदादयः कुलपूजाकृताःसर्वैःकृत्वाप्येकुलिनागर
हे शक्तिंविनामहेशानिशक्तिमंत्रेनसिद्ध्यति सर्वे
षांशक्तिःमंत्राणांशक्तिःसिद्धिप्रदायिनी नटी

© Dharmartha Trust J&K. Digitized by eGangotri

कापालिकावेषधारजकीनापितांगना योगिनीस्वप
दीशौंडीभूमैद्भनयातथा गोपनीमालिनीरम्याज्ञा
सोकार्यप्रभेदतः चतुर्वर्गोद्भवानांचप्तताःसंज्ञा
प्रकीर्तिताः पूजाद्रव्यंसमालोक्यन्तत्पगीतपराव
य चतुवर्गोद्भवारम्यासामानटीपरिकीर्त्तिता पूजा
द्रव्यंसमालोक्यसर्वेत्तांऊरुतेचसा सर्ववर्गोद्भवा

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
८८

४४

रम्याकापालीसाप्रकीर्त्तिता पूजाद्रव्यंसमालोक्यवेश्मण
वद्रन्तामिच्छुका सर्ववर्णोद्भवारम्यावेश्यासापरि
कीर्त्तिता पूजाद्रव्यंसमालोक्यरजोवस्त्रप्रकाश
येत् सर्ववर्णोद्भवारम्यारजकीसाप्रकीर्त्तिता पूजा
द्रव्यंसमालोक्ययंत्रसंस्कारतत्परा सर्ववर्णोद्भवार
म्यानापितस्यस्वतास्मृता पूजाद्रव्यंसमालोक्यया

© Dharmartha Trust J&K. Digitized by eGangotri

योगमाहरेत्स्वयं सर्ववर्णोद्भवीरम्यायोगिनीसाप्र
कीर्त्तिता ध्वजाद्भवंसमालोक्यऊलजावीरमाश्रयेत्
संत्यज्यपशुभर्त्तारंकर्मचंडालिनीस्मृता विपरीतर
तापत्येपायायितेपदछाति सर्ववर्णोद्भवारम्या
शौंडीसापरिकीर्त्तिता सर्वदायंत्रसंस्कारोयस्याश्च
परिजायते सैवभूमीद्भजारम्यासर्ववर्णोद्भवाप्रिये

© Dharmartha Trust J&K. Digitized by eGangotri

श्री०
८९

8a

आत्मानं गोपयेद्यावत्सर्वदा पञ्चसंकटे सर्ववर्णोज्ज्वाला

ग्यागोपनीसा प्रकीर्तिता पञ्चाङ्ग्वसमालोक्ययामालाप

रिनिर्मिता सर्ववर्णोज्ज्वालाग्यामालिनी सा प्रकीर्तिता

शाक्तभावे महेशानि तां सा च कौचिदाहरेत् संध्यो

पपंचमं तत्त्वं तर्पयेत्कुलमंदिरे अंगुष्ठानामिका

योगाद्धामहस्तस्य पार्वति तर्पयेत्कालिकां वीरः सा

© Dharmartha Trust J&K. Digitized by eGangotri

सायुधांसपरिवारकां अंगुष्ठोभैरवोदेवोनामिकाश
क्तिरुच्यते शिवशक्तिमयायोगात्तर्पयेद्धोरदक्षिणा
तर्पणंत्रिविधंदेविश्रेष्ठंमध्यंकनीयसं श्रेष्ठंच
दिव्यभावस्यवीरभावस्यमध्यमं वानीयसंपशू
नांचस्यादियंत्रेजलेक्रमात् इतिनिरुत्तरतंत्रेशिवशि
वासंवादेचतुर्दशःपटलः श्रीवाणीचारणाम्भोजे

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰ ९॰

भक्तिरस्तु सदा मम आचारसारतन्त्रे पञ्चमपटले
श्रीभगवानुवाच समयाष्टकं प्रवक्ष्यामि शृणुष्वैका
ग्रमानसः येन विज्ञानमात्रेण सिद्धो भवति साधकः
घातयेन्नोपयेन्नद्धिंदयेन्नविलोकयेत् पूजयेन्ना
वयेन्नैवर्जयेन्नजुगुप्सयेत् कामंक्रोधं च मात्सर्यं
विकारं चेंद्रियोद्भवं निद्रालज्जादौर्मनस्यं घातयेद

१०

© Dharmartha Trust J&K. Digitized by eGangotri

ष्कं प्रिये मंत्रमुद्रादिसूत्रं च योगिनीवीरसंगमे भैर
वागमनाचारमेतत्सर्वं प्रगोपयेत् देवं गुरुं सुरां विद्यां
साधकं योषितं तथा शुभाशुभं कर्म चैवन्निंदयेन्नक
दाचन कन्यायोनिं पशुक्रीडां नग्नां स्त्रीं प्रकटस्तनीं
सूतविग्रहं क्लीवं च पापात्मा यो विलोकयेत् देवं गुरुं
तथा साधं स्वभक्तिं चात्मानमव्ययं भक्तितः सकलाने

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
९२

तानपूजयेद्वत्प्रयत्नतः गुरोर्वाक्योपदेशंच समास्थ्यंकीती
र्यदेवता स्वधर्मंचकुलाचारं सदानत्वेनभावयेत् अ
गम्यागमनंचैवधूर्तगोष्ठीप्रवंचनं अन्तनंपापगोष्ठी
चवर्जयेत्सिद्धिसाधकः विण्मूत्रंशोणितंक्लेदंहीनां
गीपिशितंस्मरां कपालाहरणंचैवभ्रष्टोनेवर्जयग्ग
येत् इत्येवंसमयाचारंयःकरोतीहसाधकः संप्राप्य

९

© Dharmartha Trust J&K. Digitized by eGangotri

देवीसङ्गावंजीवन्मुक्तिंचगच्छति अनेनचीनाचारेण
त्वांसमाराध्यसाधकः यत्वन्यल्लभतेवस्तुतन्नास्तिभु
वनत्रये द्वितीयपटले तारिणीदक्षिणाकालीनेव
चीनक्रमंविना महाचीनक्रमाचारपरःसाधकसत्त
मः तारिणींप्रजपन्विद्यांकुलकोटीःसमुद्धरेत् नंदंति
पितरस्तस्यगाथांगायंतितेमुदा अपिनःस्वकुले

© Dharmartha Trust J&K. Digitized by eGangotri

श्री·
५२

कश्चित्कुलज्ञानी भविष्यति सधन्यः सचविज्ञानी सकविः
सचपंडितः सकुलीनः ससुकृती सवनी सचसाधकः स
ब्राह्मणः सवेदज्ञः सोग्निहोत्री सक्षोत्रियः सतीर्थसेवी सपी
ठेश्मसानिवासी ससर्वदाः सव्रती सोमपायी सयज्वा स्वी
सचवैमज्ञः सवैसवः सयोवक्ष्मसमोरः सचगाणपः स
हाचीनक्रमाचारैस्तारिणीयः समर्चयेत् सविदासव

92

© Dharmartha Trust J&K. Digitized by eGangotri

योर्मध्येमम्बिदेवगरीयमी भद्दिनायांचवत्तानायांसिद्ध
योबोयवरूपिणी स्वसाम्बिदञ्जम्लिनी विजयासंबिदंङ्क
रा वैसवीनुलसीनंगानेजोवल्लीरसेश्वरी विमर्षाह्रे
नुरत्नाचदेवीलक्ष्मीर्महोदरी समयामोहिनीगौरीसि
द्धिमूलीमहोदरी मान्तुलानीसिद्धिरूपासिद्धविद्यासर
स्वनी वाग्वादिनीसदानंदाश्नानंदापददायिनी यानि

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
५३

१३

चैतानिनामानिसेवयोत्थितिङ्मूलिकांसमाप्नोति परंवि
र्याभुक्तिंमुक्तिंप्रजायते सामर्थ्यंरहितेहैयेकर्थकर्माणि
कारयेत् विनापिममयांप्रजाऊत्रापिनश्वभोदया त्राले
गुरूतेचोत्थायभक्तितःपापनाशिनी तथासूर्योदयेजा
तेमध्येद्वैभद्दितातया तथापराह्नसमयेविहरेत्पाप
नाशिनी अर्द्धरात्रेविशेषेणवांछितार्थफलप्रदा वि

© Dharmartha Trust J&K. Digitized by eGangotri

नापिसमयादेविजपपूजादिकंकथं नैवसिद्धिमवा
मोतिअभिचारायकल्पते अपमृत्युहरंनॄनरोगशो
कविनाशिनी दुष्टशत्रुप्रशमनीसर्वलोकानुरंजि
नी सिद्धयोप्यनिमाद्यास्तस्यहस्तेव्यवस्थितः का
यकंवाचिकंचापिमानसंचापिदुष्कृतं एतत्सर्वेन
येयातिब्रह्महत्यादिकंतथा सशिवःसचयोगी

© Dharmartha Trust J&K. Digitized by eGangotri

श्री·
१४

९५

शः सच मुक्तः सर्वीन तथा स एव विमुक्तः समुक्तः समया
येन पालिता समया भञ्जिता येन समया राधिता तथा
समया पालिता येन समुक्तः सर्व पातकै भक्षयित्वा
च समयां ये मंत्रं जपेन्नरः सम्य कालमवाप्नोति सत्य
सत्य वरानने विनापि समयां देवि मंत्रं जपति नित्य
शः कल्पायुः सभवेत्सयोदेवता कोपयेद्ध्रुवं स्नानं

© Dharmartha Trust J&K. Digitized by eGangotri

देनविनाभ्रंशोनहित्वपंक्तिदेवताः द्रव्यसृष्ट्यादिकं
सर्वमानंदार्थविभावयेत् ध्यानंदेजायतेमानेनतम
त्तत्रेनकदाचन ध्रतिपानाभवेत्मत्रोजपपूजादिनि
ष्फलं बुद्धिनाशोभवेद्देविश्वनपवमितंचरेत् स्वस्वा
र्थंभक्तयेत्रैवश्रापदस्थपदेपदे ध्रतिसंदोभक्तोड़ःखं
लोकनिंदाचजायते इत्येवंसमयाचारःकथितस्त्व

© Dharmartha Trust J&K. Digitized by eGangotri

वरानने द्वविंशोयनार्थेचमंत्रेश्टणुमहेश्वरि अथम
स्विद्धोथनं ॐसर्वदेवलसंभूतेब्रलप्रतिमदानचे
भैरवाणांचत्व्यर्थपविताभवसर्वदा ॐब्रालणेपेन
मःस्वाहा ॐसिद्धिमूलिप्रियेदेविहीनबोधप्रबोधि
नि राजाप्रजावशंकरिशाड़्कंटत्रिशूलिनि ॐपवित्र
यायैनमःस्वाहा ॐअत्तानेन्यनदीमाग्रेज्वालायेत्ता

श्री॰ ५५

१५

© Dharmartha Trust J&K. Digitized by eGangotri

नद्रूपिणि आनंदस्याङ्गतिप्रीतिंसम्यग्ज्ञानेश्वयच्छमे
ॐह्रींवैष्णव्यायेनमःस्वाहा ॐनमःस्वामिनमः स्वामि
योगमार्गप्रदर्शिनि त्रैलोक्यविजयोमातःसमादिफ
लदाभव ॐक्लींरुद्रायेनमःस्वाहा ॐअमरतेअमरतोद्भ
वे अमरतवर्षिणिअमरतमाकर्षयअमरतमाकर्षयासि
द्धिंदेहि अमुकंमेवशमानयस्वाहा अथसंविनामा

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
१८

नि त्रैलोक्यविजयासिद्धासिद्धिदासिद्धिमूलिका ज्ञानेसं
वित्संविदांचश्यामाभंगारसालया योगदायोगसंसेव्या
योगमार्गप्रकाशिनी ब्रह्माणीब्रह्मसंभूताब्रह्मानन्द
प्रदायिनी वाग्देवतावशाकरीविजयाविजयप्रदा स
माधिवरदाज्ञाननाशनीत्येकविंशतिः श्वेतरक्तपीत
कृष्णपुष्पभेदाच्चतुर्विधा ब्राह्मणीश्वेतपुष्पाचन्द्रवि

96

© Dharmartha Trust J&K. Digitized by eGangotri

यारक्तपुष्पिका पीतपुष्पाचवैश्यास्याच्छूद्राचकृष्णपुष्पि
का दुग्धयोगेनविजयाकेवलानंदवर्द्धिनी महातेजस्क
रीचत्वचर्दोषादिविनिवारिणी साघृतजलयोगेनसर्वा
जीर्णविनाशिनी हृतेनमेधामायत्तेवाग्देवीवशकरा
रिणी प्रतिभाप्रभूतमांयत्तेपीवर्णाचातिनिर्मला
कासदोषानशोषांश्चमधुनामहनाशयेत् सैंधवेनम

© Dharmartha Trust J&K. Digitized by eGangotri

श्री· ८७

९७

ह्यावक्षिप्रदास्याह्लवणेनच शितयाथ्यगुडेनापिस्थूला
म्लपित्तनाशिनी अतिसारोपशमनीश्वासकाशप्रम
र्दिनी आमवातसमुद्भूतग्रहणीवादिनिवारिणी सर्वै
र्वामधुरैर्युक्तासर्वामयविनाशिनी ज्ञानविज्ञानदात्रि
णपस्थलमार्गप्रकाशिनी बहुनात्रकिमुक्तेनकेवला
चित्स्वरूपिणी प्रकाशितानवस्नेहात्सर्वतं ॥

© Dharmartha Trust J&K. Digitized by eGangotri

त्रम्हगोपिता मेविदामवयोर्मध्येमंविदेवगरीयसी
संवित्त्रयोगमेतेनेहकर्तव्यःमाधकोत्तमैः एककालेद्वि
कालंवात्रिकालंपंचकालकं नोलकंवातदर्द्धवातोल
कद्वयमेववा नचन्यूनाधिकामात्रायथाचरतिनिष्फशः
न्यूनाधिकायांमात्रायांफलंतत्त्वनजायते तस्मात्प्रमाण
मात्राहिकर्तव्यासिद्धिमिच्छता तारातंत्रेतृतीयपटले

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
१८

संविदानंदयोगेनयः कारणमदोभवेत् सएवपर

मानंदोब्रह्मसायुज्यदायकः तस्माङ्कासिद्धिमूलि

ऊलीनः कारणंपिवेत् विनानंदसंविदायाः पानंय

त्कारणस्यच तत्तुनानंदजनकंह्युद्देववचोयथा द

ष्टिमानसवाक्कायैर्यावन्नभवतिभ्रमः तावत्पानंपशु

वीनपशुपानमतः परं नयनाग्निवाणसंख्या ।

९४

© Dharmartha Trust J&K. Digitized by eGangotri

कश्चित्तु परमेश्वरि मद्यपानं प्रकर्तव्यं ममाज्ञा न कदाचन

मद्याभावे ताम्रपात्रे गव्यं दद्यात् हुतं विना अथवा वितरेत् ना

म्रे मधु दुग्धरसोद्भवं नारिकेलोदकं दद्यात् कांस्यपात्रेथ

वा द्विजः मांसाभावे तु लसुनं पिण्याकं लवणादिकं गो

धूमं हिंसडिंबं वा शुद्ध तैलेन भर्जितं मांसं वा वितरेत् सं

वीमूलमंत्रेणाभिमंत्रितं मीनाभावे तु कूष्माण्डं सुदग्धं सुप

© Dharmartha Trust J&K. Digitized by eGangotri

श्री·
५५

रिस्कृतं जंबीरं रक्तशाकं वा सुपक्वं विनिवेदयेत् दिव्यं
देव्यग्रतः पानं वीरं वीरासनस्थितं संस्काररहितं पानं प
शुपानं तु गद्यते यत्पानं हृषणं प्रोक्तं प्रायश्चित्तं तदेव
हि सर्वैश्वर्यप्रदं मोक्षदं मंत्रीसंस्कृतपानतः दीपनाशो
घटे भग्ने पात्रे वा पतिते भुवि सप्ताहं च कृते पाने श्री
चक्रं कारयेद्बुधः ज्ञानतंत्रे द्वितीयपटले । देव

९१

© Dharmartha Trust J&K. Digitized by eGangotri

नागुरुमंत्राणामेकंकृत्वाजपेन्नयः अर्थमुद्दिश्यविश्वं
द्रतस्यासिद्धोभवेन्मनुः अनन्यचित्तानवान्कृत्वागुरोराज्ञाम
विश्वमेतत् विश्वंचमंत्रदेवंचआत्मानंदेवतोपमं भूत्वा
सदाजपेद्यस्तुतस्यासिद्धोभवेन्मनुः ध्यानोक्तमूर्तिमंत्रं
चएकभावेनयोजयेत् नस्यैवमंत्रसिद्धिस्तुजायतेहि
जपुंगव चराचरंब्रह्ममयंयःपश्येत्साधकोत्तमः नी

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
१००

वोऽहं मम मं ज्ञानं मे ध्यानं मे ध्येन तथा प्रभुनः आत्मतत्वं जग
त्सर्वं सर्वं शिवमयं तथा तेन विप्रेंद्र मुक्तः स्यात्तत्वसत्व
न संशयः नारद उवाच कृतम्रयात्मको देवब्रह्मणवस्तव
वत्कृतः उच्चार्यमाणो देवेशानादः कस्मादुपस्थितः शि
व उवाच न मायारहितं ब्रह्म किंचित्कर्तुं हि शक्यते निरा
कारे निराकारा साकारे प्रकृतिः परा तयोर्भेदो न क

१००

© Dharmartha Trust J&K. Digitized by eGangotri

नैव्योयदीछेदात्मनोहितं नादेनबिंडविप्रेंद्रमकारस्या
द्भुतोविभुः ब्रमावंब्रलरूपंहिस्मरेछ्रक्त्यात्मकंद्विज
शिवउवाच यथात्रब्रह्मणोविप्रतथादेवचराचरं न
थैवप्रणवाज्जातामंत्राःसर्वेद्विजोत्तम वियद्दत्त्वयथा
ब्रह्मतथैवप्रणवोद्विज विंडरेवाविसर्गःस्याद्गह्लैवह्म
निर्यथा स्वस्वकर्मसमादायप्रकृतिर्जीवरूपधृक् न

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
१०१

ष्येवमणवोदिव्यनामामेवंमन्त्रुर्भवेत् मंत्रदेवतयोरेव
नास्तिभेदःकदाचन यथाब्रह्मतथाशक्तिर्यथामंत्रस्त
थाध्रुवः तेषांभेदंहिविप्रेंद्रसत्यंसत्येनकल्पयेत् सर्वे
षांकारणंशक्तिर्ब्रह्मादीनांचकर्मसु कर्मणायेनयेनै
वदेवादीनांलयोभवेत् तेनतेनैवविप्रेंद्र सर्वैर्दे
वादयोनरः कीटादयोपिप्रकृतौवसंत्ये ॥

10

© Dharmartha Trust J&K. Digitized by eGangotri

वनसंश्रयः ब्रह्मणेपवनयाशक्तिः स्त्रष्टादौचनयामुने
मुनरावर्तनयस्तेषांस्वस्वकर्मसमाश्रिताः मायापिश्राम
येत्सर्वंयथायंत्रीचयंत्रकं मायापिमुक्तिमार्गस्यविघ्ने
यापरिपंथिनी सातस्याचजगद्धात्रीमुक्तिदाचीनसंश
यः निराकारात्तस्माशक्तिर्ब्रह्मरूपासनातनी निराकार
द्वैककलास्त्रष्टार्थैवैविनिःसृताः तथैवब्रह्मणोविष्ण

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
१०२

102

मापिदेवीकलैकया विस्वादयोपिनस्यांवैब्रह्मणोपि
पृथक्पृथक् तृष्णायांपरमायांवैमुक्तिमार्गप्रदायिनी तृ
ष्णायांभूमिदात्रीसामुक्तिमार्गविरोधिनी तस्मादादौद्विज
श्रेष्ठतांमायांवशमानयेत् शास्त्रोक्तविहितंकर्मयदिका
म्यंनकारयेत् प्रीतयेदेवदेवस्यतत्रमायानबंधदा
श्रीनारदउवाच यदिज्ञानात्कृतंपुण्यमज्ञानात्कलुषं

© Dharmartha Trust J&K. Digitized by eGangotri

कृतं तयोर्भोगो भवेत्केन एकदा सुरनायक शिव उ
वाच एकदा न भवेद्भोगः पुण्यस्य पातकस्य च श्रा
दैकृतं महत्पापं पुण्येन स्वर्गमाप्नुयात् तदा पुण्यभोक्ता
सप्तयमे द्विजसत्तम पुण्यवसाने पापस्य भोक्ता स्यात्सतु
मानवः एवं पापेन म्रियते तेन तयोर्भोगः क्रमाद्भवेत् नारद
उवाच राम सुक्तात्यजेत्प्राणान्काश्यां वा मरणं भवेत्

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
१०३

103

त्तानगंगाभवेयस्यमत्सुर्वीपुरुषोत्तमे मुक्तिदेशुवदे
त्रेष्ठनीर्थेष्वेवसरोत्तम दंडंगहीत्वायोविप्रोम्रियतेय
त्रऊत्तचित् संन्यासिनांहिदेवेप्रावानप्रस्याथिकेतथा
श्रन्येषांत्तानिनांदेवकोभोक्ताकलुषस्यच शिवउवाच
देवेनीर्थेचमरणेरामादिनामकोतथा कायव्यूहाद्व
वेन्मुक्तिर्दिग्दंडाभ्यंतरेद्विज तेनैवजायतेनाशः।

© Dharmartha Trust J&K. Digitized by eGangotri

पापस्य कलुषस्य च ज्ञानी प्रथमकल्पस्य पापभोक्ता
भवेन्नहि ज्ञानेष्वण्यन्नमेव विप्र पापं देहान्तरं भवेत्
भ्रमते वायुरूपेण ष्वण्यवंजेन च स्पर्शेन् ज्ञानयोगेन
विप्रेंद्र लिंगदेहं प्रणाशाये लिंगदेहे कृते नाशो मरणा
ल्लीयते विभो आत्मनं तन्मयं कृत्वा सोऽहंभावेन सर्व
दा विचरे द्विज प्राहूलस्यात्मानं परितोषयेत् स

© Dharmartha Trust J&K. Digitized by eGangotri

श्री॰
१९४

वँ ब्रह्ममयं पश्यन् जीवन्मुक्तो भवेन्नरः नरस्यैव पापपुण्यानि द्वन्द्वयं यानि तानि दाहि जपुनर्जन्म द्विजश्रेष्ठ सत्यं सत्यं न विद्यते इति श्रीज्ञानतन्त्रसंहितीपटलाकतियमश्लोकालिखिताः ॥ संवत् १९४७ भाद्रो ब २९ लिखितं मोतनकौलनि ॥

१०४

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri